# Shri Dattatreya Prarthana

# श्रीदत्तात्रेयप्रार्थना

## Document Information

Text title : Dattatreya Prarthana

File name : dattAtreyaprArthanA.itx

Category : deities_misc, dattatreya

Location : doc_deities_misc

Proofread by : Paresh Panditrao, Rajani Arjun Shankar

Latest update : April 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 5, 2023

*sanskritdocuments.org*

# श्रीदत्तात्रेयप्रार्थना

ॐ नमस्ते भगवन् श्रीसद्गुरुदेव-दत्तात्रेयाय नमो नमः ॥ १॥

त्वं ब्रह्ममयोऽसि । त्वं आनन्दमयोऽसि । त्वं विज्ञानमयोऽसि ।
त्वं सत्यमयोऽसि । त्वं शान्तिमयोऽसि । त्वं प्रेममयोऽसि ।
त्वं निराकारो निरालम्बो निर्विकल्पो निर्विषयो निरञ्जनो निरङ्कुशो
निरन्तरो निराशयो निरामयो निर्धूतकल्मषोऽसि ॥ २॥

त्वदाज्ञया तपन्ति रविशशि-तारामण्डलाः ।
त्वदाज्ञया विपुलधनधान्यवती वसुधा ।
त्वदाज्ञया वहति वायुस्सन्दहत्यनलः । त्वदाज्ञयाऽऽकाशं सर्वं व्याप्नोति ।
त्वदाज्ञया यथाकालं वर्षति पर्जन्यः । त्वदाज्ञया विकसन्ति कुसुमानि ।
त्वदाज्ञया फलन्ति पादपाः । त्वदाज्ञया गायन्ति विहङ्गमः ।
त्वदाज्ञया जीवन्ति चतुर्विधयोनयः ।
त्वदाज्ञया देहे प्राणः सञ्चरति निर्गच्छति देहात् ॥ ३॥

त्वं मनश्चित्तान्तःकरणबुध्यहङ्कार-प्रेरकोऽसि ।
त्वं शमदम-तितिक्षावैराग्य-भक्तिप्रदायकोऽसि ।
त्वं द्वन्द्वदुःख-तिमिर-विध्वंसकोऽसि । त्वं मायापाश-निकृन्तकोऽसि ।
त्वं संसार-बन्धनच्छेदकोऽसि ।
त्वं सर्वसद्गुणकर्ताऽसि । त्वं सर्वदुर्गुणहर्ताऽसि । त्वं शान्तिप्रदोऽसि ।
त्वमानन्दप्रदोऽसि । त्वं प्रेमप्रदोऽसि । त्वं सकलविघ्नहरोऽसि ।
त्वमभयकरोऽसि । त्वं वरदवरोऽसि । त्वं निजपद-प्रदानकरोऽसि ॥ ४॥

ऋते त्वत् कोऽपि नेतरो वदान्यः । ऋते त्वत् कोऽपि नेतरः समर्थः ।
ऋते त्वत् कोऽपि नेतरो दयालुः । ऋते त्वत् कोऽपि नेतरः क्षमाशीलः ।
ऋते त्वत् कोऽपि नेतरो भक्तपालकः ॥ ५॥

त्वत्तः सकलैश्वर्य-भोगक्षमत्वम् । त्वत्तः सकलवस्तु-रमणीयत्वम् ।
त्वत्तः कर्मज्ञानेन्द्रिय-गणसमर्थत्वम् । त्वत्तः सकलयोग-शक्तिमत्त्वम् ।

त्वत्तः परमवैराग्य-परबुद्धिमत्त्वम् ॥ ६॥

त्वयि समुपस्थितं ब्रह्माण्डोत्पत्ति-स्थितिलयबीजम् ।
त्वयि सुप्रतिष्ठितं संसृतिनाशनाद्वैत-भावनामूलम् ।
त्वयि सन्निहितं जन्ममृत्युभय-संहननसामर्थ्यम् ॥ ७॥

कनक-कामिनी-कमनीयत्वात् त्राहि त्राहि माम् ।
काम-क्रोध-मोह-मद-मत्सरकोलाहलात् त्राहि त्राहि माम् ।
जन्म-जरा-मरण-त्रिदोषात् त्राहि त्राहि माम् ।
संसृति-दावानल-दह्यमानं पाहि पाहि माम् ।
विषयकर्दम-निमज्जमानं पाहि पाहि माम् ।
भयकर-कालदण्ड-निपीडयमानं पाहि पाहि माम् ।
धर्माचरण-दिङ्मूढोऽहं धैर्यं देहि देहि मे ।
अहङ्कारमलिन-चित्तोऽहमभयं वरं देहि देहि मे ।
त्वत् पदपङ्कज-शरणागतिं देहि देहि मे ॥ ८॥

विना त्वया नास्ति कोऽप्यन्य आपत्तिनिवारकः । त्वं प्रियतमा माताऽसि मे ।
त्वं प्रियतमः पिताऽसि मे । त्वं प्रियतमो बन्धुरसि मे ।
त्वं प्रियतमं मित्रमसि मे । त्वं पूज्यतमः सद्गुरुवर्योऽसि मे ।
ते कृपाहस्तं देहि मे शिरसि । ते पदतलकञ्जं देहि मे मनसि ।
ते सुखकर-वासोऽस्तु मे वपुषि ।
अनन्त-जन्मपर्यन्तं ते स्मरणं मे चित्तेऽस्तु ॥ ९॥

ॐ नमस्ते अत्रिपुत्राय । ॐ नमस्ते अवधूताय । ॐ नमस्ते हंसदेवाय ।
ॐ नमस्ते सद्गुरुनाथाय । ॐ नमस्ते यतिनाथाय । ॐ नमस्ते शक्तिनाथाय ।
ॐ नमस्ते सिद्धिनाथाय । ॐ नमस्ते मुक्तिनाथाय । ॐ नमस्ते जगन्नाथाय ।
ॐ नमस्ते भगवते दत्तात्रेयाय ।
ॐ नमस्ते परब्रह्मणे सच्चिदानन्दमूर्तये मुनिवर्याय नमो नमः ॥ १०॥

इति श्रीदत्तात्रेयप्रार्थना सम्पूर्णा ।

Proofread by Paresh Panditrao, Rajani Arjun Shankar

*Shri Dattatreya Prarthana*

pdf was typeset on April 5, 2023

Please send corrections to *sanskrit@cheerful.com*